# सुन्दरकाण्ड चत्वारिंशः सर्गः (४०) - ॥ हनूमत्प्रेषणम् ॥

श्रुत्वा तु वचनं तस्य वायुसूनोर् महात्मनः ।
उवाचात् महितं वाक्यं सीता सुर सुतोपमा ॥ १ ॥

त्वां दृष्ट्वा प्रिय वक्तारं सम्प्रहृष्यामि वानर ।
अर्ध सञ्जात सस्येव वृष्टिं प्राप्य वसुन्धरा ॥ २ ॥

यथा तं पुरुष व्याघ्रं गात्रैः शोकाभि कर्शितैः ।
संस्पृशेयं सकामाहं तथा कुरु दयां मयि ॥ ३ ॥

अभिज्ञानं च रामस्य दद्या हरि गणोत्तम ।
क्षिप्तामिषीकां काकस्य कोपा देकाक्षि शातनीम् ॥ ४ ॥

मनःशिलायास् तिलको गण्ड पार्श्वे निवेशितः ।
त्वया प्रनष्टे तिलके तं किल स्मर्तु मर्हसि ॥ ५ ॥

स वीर्यवान् कथं सीतां हृतां समनुमन्यसे ।
वसन्तीं रक्षसां मध्ये महेन्द्र वरुणोपमः ॥ ६ ॥

एष चूडामणिर् दिव्यो मया सुपरिरक्षितः ।
एतं दृष्ट्वा प्रहृष्यामि व्यसने त्वामिवानघ ॥ ७ ॥

एष निर्यातितः श्रीमान् मया ते वारिसम्भवः ।
अतः परं न शक्ष्यामि जीवितुं शोक लालसा ॥ ८ ॥

असह्यानि च दुःखानि वाचश्च हृदयच्छिदः ।
राक्षसीनां सुघोराणां त्वत्कृते मर्षयाम्यहम् ॥ ९ ॥

धारयिष्यामि मासं तु जीवितं शत्रु सूदन ।
मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज ॥ १० ॥

घोरो राक्षस राजोऽयं दृष्टिश्च न सुखा मयि ।
त्वां च श्रुत्वा विषज्जन्तं न जीवेयमहं क्षणम् ॥ ११ ॥

वैदेह्या वचनं श्रुत्वा करुणं साश्रु भाषितम् ।
अथाऽब्रवीन् महातेजा हनुमान् मारुतात्मजः ॥ १२ ॥

त्वच्छोक विमुखो रामो देवि सत्येन ते शपे ।
रामे दुःखाभि भूते तु लक्ष्मणः परितप्यते ॥ १३ ॥

कथंचिद् भवती दृष्टा न कालः परिशोचितुम् ।
इमं मुहूर्तं दुःखाना मन्तं द्रक्ष्यसि भामिनि ॥ १४ ॥

तावुभौ पुरुष व्याघ्रौ राजपुत्रा वरिन्दमौ ।
त्वद्दर्शन कृतोत्साहौ लङ्कां भस्मी करिष्यतः ॥ १५ ॥

हत्वा तु समरे क्रूरं रावणं सह बान्धवम् ।
राघवौ त्वां विशालाक्षि स्वां पुरीं प्रापयिष्यतः ॥ १६ ॥

यत्तु रामो विजानीया दभिज्ञान मनिन्दिते ।
प्रीति सञ्जननं तस्य भूयस् त्वं दातु मर्हसि ॥ १७ ॥

साऽब्रवी द्दत्त मेवेति मयाभिज्ञान मुत्तमम् ।
एतदेव हि रामस्य दृष्ट्वा मत्केश भूषणम् ॥ १८ ॥

श्रद्धेयं हनुमन् वाक्यं तव वीर भविष्यति ।
स तं मणिवरं गृह्य श्रीमान् प्लवग सत्तमः ॥ १९ ॥

प्रणम्य शिरसा देवीं गमनायोप चक्रमे ।
तमुत्पात कृतोत्साह मवेक्ष्य हरिपुङ्गवम् ॥ २० ॥

वर्धमानं महावेग मुवाच जनकात्मजा ।
अश्रु पूर्णमुखी दीना बाष्प गद्गदया गिरा ॥ २१ ॥

हनुमन् सिंह सङ्काशौ भ्रातरौ रामलक्ष्मणौ ।
सुग्रीवं च सहामात्यं सर्वान् ब्रूया ह्यनामयम् ॥ २२ ॥

यथा च स महाबाहुर् मां तारयति राघवः ।
अस्माद् दुःखाम्बु संरोधात् त्वं समाधातु मर्हसि ॥ २३ ॥

इमं च तीव्रं मम शोक वेगं
रक्षोभिरेभिः परिभर्त्सनं च ।
ब्रूयास्तु रामस्य गतः समीपं
शिवश्च तेऽध्वास्तु हरिप्रवीर ॥ २४ ॥

स राजपुत्र्या प्रति वेदितार्थः
कपिः कृतार्थः परिहृष्ट चेताः ।
अल्पाव शेषं प्रसमीक्ष्य कार्यं
दिशं ह्युदीचीं मनसा जगाम ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥